श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामसुप्रभातम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्रीरामसुप्रभातम् ॥

प्रातः स्मरामि रघुनाथमुखारविन्दं
मन्दस्मितं मधुरभाषि विलासफालम्।
कर्णावलम्बि चलकुण्डल गण्डभागं
कर्णान्तदीर्घनयनं नयनाभिरामम्॥ 1 ॥

प्रातर्भजामि रघुनाथकरारविन्दं
रक्षोगणाय भयदं वरदं निजेभ्यः।
यद्राजसंसदि विभिद्य महेशचापं
सीताकरग्रहण मङ्गळमाप सद्यः॥ 2 ॥

प्रातर्नमामि रघुनाथपदारविन्दं
पद्माङ्कुशादि शुभरेखिशुभावहं मे।
योगीन्द्रमानस मधुव्रतसेव्यमानं
शापापहं सपदि गौतमधर्मपत्न्याः॥ 3 ॥

प्रातर्वदामि वचसा रघुनाथनाम
वाग्दोषकारि सकलं कळुषं निहत्य।
यत्पार्वती स्वपतिना सह भोक्तुकामा
प्रीत्या सहस्रहरिनामसमं जजाप॥ 4 ॥

प्रातः श्रये श्रुतिनुतां रघुनाथमूर्तिं
नीलांबुदोत्पलसितेतर रत्ननीलाम्।
आमुक्तमौक्तिकविशेषण भूषणाढ्यां
ध्येयां समस्तमुनिभिः निजभृत्यमुख्यैः॥ 5 ॥

यः श्लोकपञ्चकमिदं नियतः पठेत
    नित्यं प्रभातसमये पुरुषः प्रबुद्धः।
श्रीरामकिङ्करजनेषु स एव मुख्यः
    भूत्वा प्रयाति हरिलोकमनन्यलभ्यम्॥ 6॥

॥ इति श्रीरामसुप्रभातं समाप्तम्॥